ISSN – 2349-3100 Peer Reviewed

चतुर्थोऽङ्कः Refereed Journal

अन्ताराष्ट्रियमूल्यांकितत्रैमासिकसन्दर्भितशोधपत्रिका

# वेदज्योतिष्मती

Vedajyotishmati

**संरक्षकाः**

**प्रो. रामचन्द्रझाः, प्रो. रामदेवझाः,**

**प्रो. देवेन्द्रमिश्रः, प्रो. शिवाकान्तझाः**

**प्रधानसम्पादकः**

**प्रो. हंसधरझाः**

आचार्यः, ज्यौतिषविभागः, राष्ट्रियसंस्कृतसंस्थानम्,

भोपालपरिसरः।

**सम्पादकः**

**डॉ. आशीषकुमारचौधरी**

असिस्टेंट-प्रोफेसर, ज्यौतिषविभागः,

क.जे.सोमैया संस्कृतविद्यापीठम्, मुम्बई।

**प्रकाशकः**

**संस्कृत-अनुसंधान-संस्थानम्, के. एम. टैंक लहेरियासरायः, दरभंगा**

# सम्पादकमण्डलम्


**1 प्रो .बोधकुमारझाः**
आचार्य, व्याकरण-विभाग,
क. जे. सोमैया-संस्कृतविद्यापीठ, मुम्बई ।

**2 प्रो. हंसधरझाः**
ज्योतिष विभाग ,आचार्य,
राष्ट्रिय संस्कृत संस्थान , भोपाल परिसर, भोपाल।

**3 प्रो. प्रमोदवर्धनकौण्डिल्यायनः**
विभागाध्यक्ष, मीमांसा दर्शन विभाग नेपाल,
नेपाल संस्कृत विश्वविद्यालय, काठमाण्डु, नेपाल ।

**4 जूही जेनोजे**
आचार्या,दर्शन विभाग,
कोरिया विश्वविद्यालय, सीओल, कोरिया ।

**5 डॉ. प्रवेशसक्सेना**
पूर्व आचार्या,संस्कृत विभाग,
जाँकिर हुसैन महाविद्यालय
दिल्ली विश्वविद्यालय।

**6 डॉ. धनञ्जयमणित्रिपाठी**
आचार्य ,संस्कृत विभाग,
मोदी विश्वविद्यालय, राजस्थान ।

**7 डॉ. दिलीपकुमारझाः**
विभागाध्यक्ष-धर्मशास्त्र विभाग
कामेश्वर सिंह संस्कृत विश्वविद्यालय, दरभंगा ।

**8 डॉ. राजीवमिश्रः**
प्राचार्य, सन्तनागपाल संस्कृतमहाविद्यालय,
एवं शोध संस्थान, सम्पूर्णानन्द संस्कृत
विश्वविद्यालय, नई दिल्ली।

**9 टेल्टो डेल्टेज**
आचार्य दर्शन एवं संस्कृति विभाग,
हेल्डमार्ग विश्वविद्यालय,हेल्डनवर्ग, जर्मनी।

**10 प्रो. विद्यानन्दझाः**
साहित्यविभागाध्यक्ष,
भोपाल परिसर, भोपाल।

**पुनर्वीक्षणमण्डलम्**

**1. आचार्य रामदेवझाः,**
पूर्व आचार्य ज्योतिष विभाग,
लालबहादुर शास्त्री, राष्ट्रिय संस्कृत विद्यापीठ, दिल्ली ।

**2. आचार्य नीलाम्बर चौधरी,**
आचार्य रामभगत राजीवगाँधी महाविद्यालय दरभंगा ।

**3 आचार्या प्रवेश सक्सेना,**
आचार्या ,जाँकिर हुसैन महावि., दि. विश्व.,दिल्ली

**प्रबंधसंपादकः**

1. **श्री पंकजठाकुर**
2. **किरणमिश्रा** ल.ना. मि.वि दरभंगा।

**परामर्शदातृसंपादकः**

1. **डॉ. रंजय कुमार सिंह**
रा. सं. संस्थान, मुम्बई ।

**सहसंपादिका**

1 **डॉ गीता दूबे** , रा. सं. संस्थान, मुम्बई ।

**सम्पादकसहायकः**

1.**श्री सत्यनारायणः,** रा. सं. संस्थान, मुम्बई ।


@copy right – Rashtriya Sanskrit Anusandan Sansthan

Email – rsas.kothram@gmail.com, vjvv.rs@gmail.com,
Ph No. 06272-224671, 09619269812, 07506137027

पत्रिका में प्रकाशित लेखों से प्रकाशक का सहमत होना अनिवार्य नहीं है। विवाद का समाधान दरभंगा न्यायालय से ही स्वीकार्य है । लेखों को परिवर्तित, स्वीकृत एवं अस्वीकृत करने का पूरा अधिकार प्रकाशक को होगा ।A trilingual Educational Sanskrit Research Journal

Published by the Sanskrit Anusandhan Sansthan, Darbhanga

**From letter no-671/2014-15 Place on Rashtriya Sanskrit Anusandhan sansthan will kown as the Sanskrit Anusandhan Sansthan, Darbhanga**

# सम्पादकीयम्

प्राच्यज्ञानविज्ञानयोश्चिन्तनप्रवाहो नावरुद्ध्येत, वेदविद्याया अनुसन्धानात्मकं ज्ञानञ्च चिरं लोके प्रतिष्ठितं स्यादितिधिया प्रवर्तिताया लोकहितभावनाभरितायास्त्रैमासिक्या वेदज्योतिष्मतीपत्रिकायाश्चतुर्थोऽङ्कोऽचिरादेव विदुषाङ्करकमलेषु सादरं समर्प्यत इति महान् सन्तोषः। अङ्केऽस्मिन् संस्कृताङ्ग्लहिन्दीभाषोपनिवद्धा विविधशास्त्राणां प्रौढा निबन्धाः सन्ति विलसिताः । निबन्धा एते स्वस्वविषयान् ऋजुमार्गेण दृढबन्धेन सरलशब्दसुमनोगुम्फेन प्रस्तुवन्ति। नात्र सन्देहो यन्निबन्धैरेतैः शास्त्रीयविषयविस्तरो भवत्येव, प्रसारश्च संजायते संस्कृतविद्यायाः । अस्माद्धेतोर्हर्षनिर्भरेऽस्मिन् क्षणे संपुटितपाणियुगलोऽहं विदुषो लेखकान् सविनयं प्रणम्य अन्तर्मनसा तेषां प्रति कार्तज्ञं विनिवेदयामि । आशासे च यदेवमेव तेषां चतुरचमत्कारकारिचटुला लेखनी निर्बाधं शास्त्रानुसन्धाने संस्कृतविद्याप्रचारे च प्रवर्ततामिति ।

एवं शोधपत्रिकेयंत्रैमासिकीदेशदेशान्तरगतानांविविधविदुषां ज्ञानविज्ञानमयैश्शोधलेखैश्शोभमाना लोकमाह्लादयन्ती प्राकाश्यमेतीति मोदते मे मनः। आशासेऽङ्कोऽयञ्चतुर्थोऽपि पूर्ववदेव शोधच्छात्रोपकारी, पाठकानां स्वान्ताह्लादकारी च स्यात्।

पत्रिकाया अस्याः प्रकाशने मुख्यकारणभूतस्य राष्ट्रियसंस्कृतसंस्थाने सोमैयापरिसरे अध्यापयतः प्रामुख्येण सम्पादनदायित्वं निर्वहतः परमजिज्ञासुयुवपण्डितस्य डॉ. आशीषकुमारचौधरीमहोदयस्य कृते हृदयेनाशेषं साशिषं धन्यवादं प्रयच्छामि। अस्मिन्नेव क्रमे साभिनन्दनं साधुवादं समर्पयामि तेषां समेषां विद्वन्निकराणां प्राध्यापकानां शोधच्छात्राणां कृतेऽपि येषां सार्थकश्रमोद्भूतैश्शोधपत्त्रैः पत्रिकेयं गौरवाय कल्पते। क्रमेऽस्मिन् ते सर्वेऽपि अक्षरसंयोजकादिसहयोगिनः पत्त्रिकाप्रकाशनाधिकारिणश्चाभिनन्दनीयाः साधुवादार्हाश्च येषाममूल्यं योगदानं वेदज्योतिष्मतीपत्त्रिकाप्रकाशनरूपज्ञानयज्ञे समधिगतम्।

अन्तेचकामयेभगवन्तंमहाकालंयदेवमेवज्ञानविज्ञानोद्भासकसारगर्भितविपश्चिल्लेखरञ्जिता पत्त्रिकेयं प्राकाश्यमधिगच्छन्ती अशेषकालं यावल्लोकानुरञ्जिनी स्यादिति ।

**वेदज्ज्योतिष्मतीत्यस्याः पत्त्रिकायाः सतां प्रियः ।**
**चतुर्थाङ्कोऽपि लोके स्याद्विद्वच्चित्तानुरञ्जकः।।**

गुणैकपक्षपातिनां सहृदयानां विदुषां शुभाशंसनमपेक्षमाणः-

**प्रधानसम्पादकः**

# विषयसूची


| | | पृष्ठसंख्या |
|---|---|---|
| सम्पादकीयम् | प्रो.हंसधरझाः | 3 |
| शास्त्रयोनित्वात् ( ब्रह्मसूत्र – 1-1-3) | प्रो .बोधकुमारझाः | 5 |
| भरतनाट्यशास्त्रे नाट्यगृहशिल्पविधानम् | प्रो. हंसधरझाः | 6 |
| कुहनाभैक्षवप्रहसनस्येतिवृत्तसमीक्षणम् | डा.नारायणन्.ई.आर् | 9 |
| प्राकृतिक आपदाओं का ज्योतिषशास्त्र द्वारा पूर्वानुमान | डॉ. राजीव रंजन | 12 |
| वेदकालीन पत्नी का भारतीय संस्कृति में योगदान | डा. अपर्णा धीर | 15 |
| सोमनाथ मन्दिर का भौगोलिक एवं ऐतिहासिक स्वरूप | डा.आशीष कुमार चौधरी | 19 |
| वैदिकदेवः श्रीजगन्नाथः | सपन कुमार पण्डा | 23 |
| अष्टकूट विचार कैसे प्रकार करें | किरण मिश्रा | 26 |
| समकालीन कविता में स्त्री चिन्तन | डा. गीता दुबे | 28 |
| **The Ideals in Vedic Education** | **Dr. Prem Singh Sikarwar** | 32 |
| ENGLISH – A GLOBAL LANGUAGE IN A MULTILINGUAL COUNTRY | Dr. Leena Tiwari | 35 |
| **ROLE OF YOGA EXERCISE IN PHYSICAL FITNESS** | **Shankar Baburao Aandhale** | 37 |

# *दार्शनिक स्तम्भ*

## शास्त्रयोनित्वात् ( ब्रह्मसूत्र – 1-1-3 )

✍प्रो .बोधकुमार झा

[ शब्दार्थ – शास्त्र = ऋग्वेद आदि के, योनित्वात् = कारण होने से , ब्रह्म सर्वज्ञ है। ]

पूर्वसूत्र में जगत् का कारण ब्रह्म को बताया गया है। वह ब्रह्म सर्वज्ञ है। कोई भी ज्ञान ऐसा नहीं , जो कि ब्रह्म में नहीं हो। जगत् में विद्यमान कीट – पतङ्ग से लेकर पर्वत , समुद्र , पृथ्वी , जल , तेज , वायु , आकाश और बुद्धिजीवी मानव तक के रचनाकार ब्रह्म हैं। कोई किसी चीज को बनाता तभी है , जब वो पूर्णतः उसे जानता है। ब्रह्म ने भी सर्व ( सभी ) को बनाया है , तो वह सर्वज्ञ अवश्य है। इस प्रकार ब्रह्म का पूर्वसूत्र से जगत् कर्त्ता होना तो सिद्ध होता ही है , साथ – साथ उसकी सर्वज्ञता भी सिद्ध होती है। इस सूत्र में सर्वज्ञता सिद्ध करने के लिए दूसरा तर्क भी व्यास देते हैं – शास्त्रयोनित्वात्। अर्थात् ब्रह्म शास्त्रों के योनि ( कारण ) है , अतः वह सर्वज्ञ है। शास्त्र किसे कहते हैं ? शास्त्र वह है जो सभी वर्णों का , सभी आश्रमों का गर्भ से लेकर श्मशान तक ब्राह्ममुहूर्त्त से लेकर रात तक , नित्य , नैमित्तिक और काम्य इन तीन प्रकार के कर्मों के लिए और ब्रह्मज्ञान के लिए शासन करता है। ऐसा शास्त्र ऋग्वेद आदि वेद हैं। यह वेद इतना महत्वपूर्ण है कि दश विद्याओं के द्वारा व्याख्यायित होता है। दश विद्यायें हैं – पुराण , न्याय , मीमांसा , धर्मशास्त्र , शिक्षा , कल्प , व्याकरण , निरुक्त , छन्दस् और ज्योतिष। वेद प्रदीपवत् हैं। जैसे प्रदीप अंधेरे में सभी वस्तुओं का ज्ञान कराता है , वैसे ही वेद असन्दिग्धरूप से सभी का प्रकाशक है। इस तरह वेद सर्वज्ञ सदृश है,और इस सर्वज्ञ सदृश वेद का कारण होने के कारण ब्रह्म सर्वज्ञ हैं , यह सिद्ध होता है। लोक में देखा गया है कि जो ग्रन्थकार ग्रन्थ बनाता है , वह ग्रन्थकार उस ग्रन्थ में प्रतिपादित ज्ञान से अधिक ज्ञानवान् होता है। जैसे पुस्तक में कोई लेखक लिखता है कि गन्ना , खीर , गुड, लड्डू ये सब मीठे हैं। पर इन सब के मीठेपन में क्या फर्क है , इस बात को लेखक जानता तो है , पर उसका विवरण पुस्तक में नहीं दे पाता। वेद यद्यपि ज्ञान की खान है। ऋग्वेद की इक्कीस , यजुर्वेद की एक सौ एक , सामवेद की एक हजार एवम् अथर्ववेद की नौ शाखाएँ हैं। इनमें देवता , पशु – पक्षी आदि सभी योनियों के स्वरूप एवं कर्त्तव्य , अकर्त्तव्य का विधान है। फिर भी निःश्वास की तरह बिना परिश्रम का ब्रह्म से यह सम्भव होता है। बृहदारण्यकोपनिषद् में कहा गया है – अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः। अर्थात् वेद ब्रह्म का निःश्वास है। जैसे साँस बिना प्रयास किये निकलती है, उसी तरह वेद भी ब्रह्म से निकलता है। यह वेद प्रत्येक सृष्टि में यथावत् ब्रह्म के निःश्वास से प्रादुर्भाव होता है।इसमें कोई अन्तर नहीं होता। जैसे किसी भी नई सृष्टि में अग्नि किसी को शीतल नहीं करती है। जल किसी को जलाता नहीं है। क्योंकि उसका वह स्वभाव है। उसी तरह वेद भी हर युग में एक जैसा ही होता है। इसलिए वेद को अपौरुषेय कहा जाता है। अपौरुषेय अर्थात् वेद की बनावट में तनिक भी बदलाव करने के लिए पुरुष ( ईश्वर ) स्वतन्त्र नहीं होता है। उक्त सूत्र में वेद को शास्त्र शब्द से और कारण योनि शब्द से कहा गया है। सभी ज्ञानों से पूर्ण वेद के कारण होने से ब्रह्म में सर्वज्ञता तथा बिना परिश्रम के वेद जैसी ज्ञानराशि को निःश्वास के रूप में निकालने से ब्रह्म में सर्वशक्तिसम्पन्नता प्रमाणित होती है।

**शब्द - अभिव्यक्ति की सीमा होती है, किन्तु ज्ञान असीम है ।**

**आचार्य, व्याकरण-विभाग, क. जे. सोमैया-संस्कृतविद्यापीठ, मुम्बई।**

# भरतनाट्यशास्त्रे नाट्यगृहशिल्पविधानम्

✍प्रो. हंसधरझाः

"इहादिर्नाट्ययोगस्य नाट्यमण्डप उच्यते"। श्लोकार्धेऽस्मिन् नाट्यप्रसङ्गे नाट्यगृहस्य प्राथम्यं प्रतिपादितम् भरतमुनिना। नाट्यशास्त्रे हि द्वितीयाध्याये विशेषेण नाट्यगृहविषयकं विवेचनं कृतं भरतेन। तत्र मुख्यरूपेण विकृष्टं चतुरस्रं त्र्यस्रं चेति त्रिविधं नाट्यगृहं प्रतिपादिम्। यथा-

**त्रिविधः सन्निवेशश्च शास्त्रतः परिकल्पितः । विकृष्टश्चतुरस्रश्च त्र्यस्रश्चैव तु मण्डपः।।**

तत्प्रत्येकमपि ज्येष्ठमध्यमकनिष्ठभेदैस्त्रिविधम्। यथा-

**तेषां त्रीणि प्रमाणानि ज्येष्ठं मध्यं तथाऽवरम् । प्रमाणमेषां निर्दिष्टं हस्तदण्डसमाश्रयम्।।**

एवं नवविधेषु नाट्यगृहेषु विकृष्ट- चतुरस्र-त्र्यस्र-नाट्यगृहाणामेकैकस्य प्रकारस्य वर्णनमुपलभ्यते नाट्यशास्त्रे। तत्र विकृष्टनाट्यगृहं वर्णयता भरतेन लिखितं यदस्य पूर्वापरं दैर्ध्यं चतुःषष्टिहस्तमितं, दक्षिणोत्तरा च विस्तृतिर्द्वात्रिंशद्धस्तमिता भवेत्। तद् यथा-

**चतुःषष्टिकरान्कुर्याद् दीर्घत्वेन तु मण्डपम् । द्वात्रिंशतं च विस्तारान् मर्त्यानां यो भवेदिह।।**

एवमुपर्युक्तदैर्ध्यविस्तारपरिमितभूमौ सर्वप्रथमं शास्त्रोक्तविधानेन खातं कृत्वा ततः शिलान्यासं भित्तिं च विधाय स्तम्भस्थापनं कुर्यादित्युक्तम्। यथा-

**भित्तिकर्माणि निर्वृत्ते स्तम्भानां स्थापनं ततः।**

एवं नाट्यगृहभूमेराग्नेय्यादिषु चतुर्षु कोणेषु चत्वारो दृढाः स्तम्भा ब्राह्मण-क्षत्रिय-वैश्य-शूद्रसंज्ञकाः स्थापयितुं निर्दिष्टाः। तेषु च स्तम्भेषु क्रमशः श्वेत-रक्त-पीत-नीलपदार्थानामुपयोगो भवतिस्म यथा-

**प्रथमे ब्राह्मणस्तम्भे सर्पिः सर्षपसंस्कृते।सर्वशुक्लो विधिः कार्यो दद्यात्पायसमेव च।।**
**ततश्च क्षत्रियस्तम्भे वस्त्रमाल्यानुलेपनम् । सर्वं रक्तं प्रदातव्यं द्विजेभ्यश्च गुडौदनम्।।**
**वैश्यस्तम्भे विधिः कार्यो दिग्भागे पश्चिमोत्तरे। सर्वं पीतं प्रदातव्यं द्विजेभ्यश्च घृतौदनम्।।**
**शूद्रस्तम्भे विधिः कार्यः सम्यक् पूर्वोत्तराश्रये।नीलप्रायं प्रयत्नेन कृशरा च द्विजाशनम्।।**

**अपि च –**

**पूर्वोक्तब्राह्मणस्तम्भे शुक्लमाल्यानुलेपने। निक्षिपेत्कनकं मूले कर्णाभरणसंश्रयम्।।**
**ताम्रं चाधः प्रदातव्यं स्तम्भे क्षत्रियसंज्ञके। वैश्यस्तम्भस्य मूले तु रजतं सम्प्रदापयेत्।।**
**शूद्रस्तम्भस्य मूले तु दद्यादायसमेव च। शेषेष्वपि च निक्षेप्यं स्तम्भमूले तु काञ्चनम्।।**

अत्र ध्यातव्यमिदमस्ति यन्नाट्यगृहनिर्माणेक्रमे आचार्यभरतेन तत्सर्वमपि नियमपालनं निर्दिष्टं यत् खलु वास्तुरचनाक्रमे ज्यौतिषशास्त्रीयं विधनमपेक्षितं भवति।

एवं विहितसूत्रेण विहितमुहूर्तेषु खातखननं शिलान्यासं मित्तिनिर्माणञ्च विधाय पूर्वोक्तस्य समग्रस्य क्षेत्रस्य पूर्वापरं भागद्वयं विधेयम्। तत्र यः पूर्वार्धभागः स प्रेक्षाकाणामुपवेशनाय प्रेक्षागृहत्वेन व्यवस्थापितः। अपरार्धभागश्च योऽवशिष्टस्तस्य पुनः पूर्वापरं भागद्वयं विधाय तत्र पश्चिमार्धे नेपथ्यगृहं निर्धारितम्। भागस्यास्योपयोगः पात्राणां कृते वेशभूषोपयोगार्थं भवति स्म। अथ च नेपथ्यञ्च प्रेक्षागृहञ्चान्तरा योऽवशिष्टो भागस्तस्यापि पूर्वापरौ समौ विभागौ विधाय, तत्र प्रेक्षागृहसंलग्नभागस्योभयपार्श्वतः अष्टहस्तात्मकौ चतुस्रभागौ विहाय मध्ये योऽवशिष्टः षोडशाष्टहस्तपरिमितदैर्ध्य-विस्तारविशिष्ट आयताकारको भागः स रङ्गपीठत्वेन निर्दिष्टः। अथ च नेपथ्यभागसंलग्नमवशिष्टं भागं त्रिधा विभज्य मध्यभागेऽष्टहस्तात्मके चतुरस्त्रे रङ्गशीर्षस्य कल्पनास्ति। रङ्गशीर्षं रङ्गपीठञ्चोभेऽपि नटवर्गाय नाट्यप्रयोगप्रदर्शनार्थं व्यवस्थापिते आस्ताम्। यथा-

**चतुःषष्टिकरान कृत्वा द्विधा कुर्यात्पुनश्च तान्। पृष्ठतो यो भवेद् भागो द्विधाभूतस्य तस्य तु ।।**
**सममर्धविभागेन रङ्गशीर्षं प्रकल्पयेत्। पश्चिमे च विभागेऽथ नेपथ्यगृहमादिशेत्।।**
**विभज्य भागान् विधिवद् यथावदनुपूर्वशः।। इति**

रङ्गपीठस्योभयतो यौ चतुरस्रौ तयोश्चतुर्षु कोणेषु चत्वारश्चत्वारः स्तम्भा निर्मीयन्ते स्म। यथा "चतुःस्तम्भासमायुक्ता वेदिकायास्तु पार्श्वतः"। स्तम्भा एते विशेषेणोन्नता भवन्ति स्म। एतेषामुपरि गजपरिष्टोम (हौदा) इव सूच्याग्रस्तम्भा भवन्ति स्म। भागद्वयमिदं मत्तवारिणीपदेनाख्यातम्। यथा-

**रङ्गशीर्षस्य पार्श्वे तु कर्तव्या मत्तवारणी। चतुःस्तम्भसमायुक्ता रङ्गपीठप्रमाणतः।।**

अनयोरुपयोगः कक्ष्यारूपेण भवति स्म। मत्तवारिण्योराधारभूमी रङ्गपीठश्चेत्युभेऽपि सम्मुखस्थप्रेक्षागृहभूमितः सार्थकहस्तमिते उन्नते भवेतामित्युक्तं नाट्यशास्त्रे। यथा-

**अध्यर्धहस्तोत्सेधेन कर्तव्या मत्तवारिणी। उत्सेधेन तयोस्तुल्यं कर्तव्यं रङ्गमण्डपम्।।**

अथ च नेपथ्यभूमिं रङ्गपीठं चान्तरा रङ्गशीर्षाख्यको भागो भवित स्म, यत्र हि षड्दारुमयाः स्तम्भा भवन्ति स्म। एतत्स्तम्भविषये विवेचयताऽभिनवगुप्तेन लिखितं यत्- "नेपथ्यभित्तिलग्नौ स्तम्भौ अष्टहस्तान्तरावन्योन्यं निवेश्य तयोस्सम्मुखं तदपेक्षया चतुर्हस्तान्तरं स्तम्भद्वयं तेषामधस्तनं कार्यं स्तम्भद्वयमिति षट"।अर्थाद्रङ्गशीर्षस्य चतुर्षु कोणेषु चत्वारः स्तम्भा भवन्ति स्म। तथा तत्रोभयपक्षयोः स्थितयोर्द्वयोरपि स्तम्भयोः साक्षान्मध्यभागयोरेकैकः स्तम्भो भवति स्म। मन्ये एतन्निर्दिष्टयोः स्तम्भयोस्तथा नेपथ्यसंलग्नयोः स्तम्भयोः सहाय्येन मृच्छकटिकवर्णितोद्दामच्छदिः, अथवा रत्नावल्यां निर्दिष्टप्रासाद इत्यादिकस्य प्रदर्शनं क्रियते स्म। अथवा भागाविमौ पीठस्य साक्षात्पृष्ठस्थित्वात् प्रसङ्गवशादत्रैव तिरस्करणीं प्रयुज्यैककालावच्छेदन भिन्नो भिन्नो द्वौ प्रसङ्गौ प्रदर्श्येते स्म। यथा भवभूतेरुत्तररामचरिते एकस्मिन्नेव काले रामवासन्त्योस्तथा सीतातमसयोः पृथक-पृथक पारस्परिकवार्तालापयोः प्रसङ्गौ स्तः। मन्ये, एवम्भूतयोः प्रदर्शनमत्रोभयोर्भागयोरेकस्मिन्नेव काले क्रियते स्म, येन तौ द्वापि युग्मौ परस्परदृष्टौ न स्याताम्, परं प्रेक्षकाणां दृष्टगौ भवेतामिति। अथ चात्र रङ्गशीर्षस्य भूमिरन्यभागापेक्षया किञ्चिदुन्नता भवति स्म।

**स्मुन्नतं समञ्चैव रङ्गशीर्षं तु कारयेत्। विकृष्टेरून्नतं कार्यं चतुस्रां समं तथा।।**

एवम्मध्यमनाट्यगृहेऽत्र द्वाराणि पञ्च भवन्ति स्म, यत्रैकं प्रेक्षकाणां प्रवेशायापराणि च नाट्यपात्राणां प्रवेशाय भवन्ति स्म। एवमत्र भरतमुनिप्रतिपादितं मध्यमविकृष्टनाट्यगृहं समासेन प्रतिपादितम्। तत्र ज्येष्ठविकृष्टनाट्यगृहस्य दैर्ध्यं ह्यष्टोत्तरशतमितं तथा कनिष्ठविकृष्टनाट्यगृहस्य द्वात्रिंशद्धस्तमितं कथितम्। तद् यथा

**अष्टाधिकं शतं ज्येष्ठं चतुःषष्टिस्तु मध्यमम्।कनीयस्तु तथा वेश्म हस्ता द्वात्रिंशदिष्यते।।**

मण्डपस्य विशालाधिक्ये सति प्रेक्षका बहुविधदृष्टिभेदान् प्रयान्ति, नैव च पाठमेव सम्यक्तया श्रोष्यन्तीति धियाऽचार्येण भरतमुनिना मध्यमप्रकारस्य नाट्यगृहस्य प्राधान्यं प्रतिपादितम्। यथा-

**प्रेक्षागृहाणां सर्वेषां तस्मान् मध्यममिष्यते। यावत्पाठ्यं च गेयं च तत्र श्रव्यतरं भवेत्।।**

अथ च विकृष्टस्येव चतुरस्रस्यापि नाट्यगृहस्याष्टोत्तरशतादिहस्तभेदेन त्रिविधत्वं प्रतिपादितं भारते नाट्यशास्त्रे। तत्र त्रयाणां प्रकाराणां मध्ये द्वात्रिंशद्धस्तात्मकस्य समचतुरस्रस्य कनिष्ठाख्यस्य नाट्यगृहस्य वर्णनं प्राप्यते। यथा-

**अष्टहस्तं तु कर्तव्यं रङ्गपीठं प्रमाणतः। चतुरस्रं समतलं वेदिकासमलङ्कृतम्।।**

एवं नाट्यगृहस्यास्य वर्णनक्रमे भरतस्याभिप्रायं स्पष्टीकुर्वद्भिर्विविधटीकाकारैर्वैविध्यं प्रतिपादितम्। तत्राभिनवगुप्तेनोल्लिखितं वार्तिककारश्रीशङ्कुकमतमत्र विविच्यते। श्रीशंङ्कुकः कथयति- "अष्टाभिर्भागैः सर्वतःक्षेत्रं विभज्यते येन चतुरङ्गफलकवत् चतुःषष्टिकोष्ठं भवति। तत्र मध्यमकोष्ठचतुष्के रङ्गपीठं सर्वतोऽष्टहस्तम्। तस्य पश्चिमे भागे प्राक्पश्चिममेव द्वादशहस्तं दक्षिणोत्तरे द्वात्रिंशतत्करं क्षेत्रमवशिष्यते। यद् रङ्गपीठत्वेन स्वीकृतं तद् द्विहस्ताष्टकमेव। यदवशिष्टं क्षेत्रं तन्मध्याद्रङ्गपीठनिकटगतं प्राक्पश्चिमतश्चतुर्हस्तं, विस्तारेण द्वात्रिंशद्धस्तं क्षेत्रम्। तस्माद् विभज्यते तावत्प्रमाणम्। एवं पश्चिमभागेऽपि विभज्य रङ्गशीर्षकसंस्थानं रङ्गशिरः कुर्यात्। ततोऽपि पश्चिमे नेपथ्यगृहम्" इति।एवं निर्धारिते पीठादिके रङ्गपीठस्य चतसृषु दिक्षु दशानां स्तम्भानां स्थापनं कर्तव्यमिति भरतस्याभिप्रायं स्पष्टीकुर्वता श्रीशङ्कुकेन लिखितं यत्- "कोणचतुष्टये तावच्चत्वारः। तत्राग्नेयस्तम्भाच्चतुर्हस्तान्तरो दक्षिणः स्तम्भः। तथैव नैऋतस्तम्भाद्वितीयः। एवमुदीच्यामपि स्तम्भद्वयम्। पूर्वभागे आग्नेयेशानदिग्गतात् स्तम्भद्वयाच्चतुर्हस्तान्तरं स्तम्भद्वयमिति षट्। कोणगाश्चत्वार इति दश। एतद् बहिः सामाजिकानामासनानि" इति। एवं स्थापितेषु दशसु स्तम्भेषु पुनश्चतुर्दशानां स्तम्भानां स्थापनभीष्टं भरतस्य। तत्र प्रथमं षण्णां स्तम्भानां स्थापनं श्रीशङ्कुकेन निम्नप्रकारेण स्पष्टीकृतम्। यथा- "रङ्गपीठस्य दक्षिणतो निवेशितस्तम्भद्वयाच्चतुर्हस्तान्तरावन्योन्यमष्टहस्तान्तरौ द्वौ। तत आग्नेयस्तम्भसम्मुखो योऽन्यस्तु पूर्वस्तम्भः ततश्चतुर्हस्तान्तरं दक्षिणं स्तम्भं कुर्यादेवमुत्तरत्रापि" इति।पुनश्चावशिष्टानामष्टानां स्तम्भानां स्थापनक्रमं व्यनक्ति श्रीशङ्कुकः- "दक्षिणभित्तेरुदग्भागे चतुर्हस्तान्तरं पूर्वस्थापितस्तम्भाद् भित्तेश्चैकं स्तम्भं दद्यात् पूर्वम्। एवम् उत्तरभित्तेः दक्षिणदिग्भागे। ततः पूर्वभित्तेश्चतुर्हस्तान्तरौ रङ्गभागद्वयानुसारेण। ततोऽपि चतुर्हस्तान्तरौ द्वौ" इति। एवमाहत्य नाट्यगृहेऽत्र प्रयुज्यमानाः स्तम्भाश्चुर्विंशतिः। तत्र प्रतीयते यत् प्रेक्षकासनोपयुक्तानां चतुर्दशानां स्तम्भानामुन्नतत्वं सोपानमिव रङ्गपीठाच्चतुर्हस्तमिताद्दूरतो भित्तिं प्रति वर्धते क्रमश इति। मण्डपेऽत्रापि विकृष्टमण्डप इव पञ्चद्वाराणि भवन्तीति बहूनामभिप्रायः। परमत्राभिनवगुप्तानुसारं नेपथ्याद्रङ्गपीठं प्रवेष्टुं प्रेक्षकद्वारसम्मुखं षष्ठमपि द्वारं, येन सूत्रधारो नटी च

प्रविशतः स्म। अथ च तृतीयं खलु भरतकथितं नाट्यगृहं त्र्यास्राख्यं यद्धि विकृष्टमिव ज्येष्ठमध्यमकनिष्ठभेदेन त्रिधा। परमत्रापि भरतो दैर्ध्यादिकमनुक्त्वैव त्र्यस्राख्यं नाट्यगृहं वर्णितवानस्ति। तद् यथा-

**त्र्यस्रं त्रिकोणं कर्तव्यं नाट्यवेश्मप्रयोक्तृभिः। मध्ये त्रिकोणमेवास्य रङ्गपीठं तु कारयेत्।।**

श्लोकस्यास्य भावं स्पष्टयताऽभिनवगुप्तेन लिखितं यत् - "विकृष्टचतुरस्रमानद्वयमेव भवति। मध्ये च त्रिकोणमेव रङ्गपीठम्। तथैव रङ्गशिरः। नेपथ्यगृहञ्च"। अर्थात् त्र्यस्रमिदं नाट्यगृहं त्रिभुजाकारकं भवति। तत्र मध्ये रङ्गशीर्षं रङ्गपीठं नेपथ्यगृहं च त्रिकोणात्मकानि तथा प्रेक्षागृहं चतुर्भुजाकारकं भवतीति भावः। एवमत्र त्र्यस्रनाट्यगृहवर्णनक्रमे पुनरावृत्तिर्न स्यादिति धिया वक्ति मुनिर्भरतः- **विधिर्यश्चतुरस्रस्य भित्तिस्तम्भसमाश्रयः। स तु सर्वः प्रयोक्तव्यस्त्र्यस्रस्यापि प्रयोक्तृभिः।।**

तात्पर्यमिदं यच्चतुरस्रेऽपि सर्वोऽपि विधिरनुष्ठेयः। अर्थाच्चतुरस्रनाट्यमण्डपस्य कृते यद् भित्तिविषये स्तम्भविषये वा विधानं विहितं तदेवात्रापि त्रयस्रनाट्यमण्डपेऽवगन्तव्यमिति भावः। वस्तुतो भारतेऽस्मिन्नाट्यशास्त्रे प्रेक्षागृहविषयकं विशदं खलु राजते विवेचनम्। तत्र निर्माणक्रमे भित्तिस्थापनं स्तम्भस्थापनमित्यादिकं सर्वमपि शास्त्रोक्तपूजनादिविधानेनैव कार्यमित्याह। यथा- **श्रूयतां तद् यथा यत्र कर्तव्यो नाट्यमण्डपः। तस्य वास्तु च पूजा च यथा योज्या प्रयत्नतः।।**

पुनश्च- **सर्वलक्षणसम्पन्ने कृते नाट्यगृहे शुभे। गावो वसेयुः सप्ताहं सह जप्यपरैर्द्विजैः।।**

**ततोऽधिवासयेद् वेश्म रङ्गपीठं तथैव च। मन्त्रपूतेन तोयेन प्रोक्षिताङ्गो निशागमे।।इत्यादि।**

अत्र हि नाट्यगृहादिषु विविधानि मनोहराणि चित्राणि लेख्यानि, विविधाश्चानुलेपाः प्रयोक्तव्या इत्यादिकं बहुविलक्षणतया विवेचितं, परमत्र निबन्धे विस्तारभिया नोल्लिखितम्।

**सन्दर्भग्रन्थसूची**

[1] भरतनाट्यशास्त्रम् ,अ. 02,श्लो 3
[2] भरतनाट्यशास्त्रम्,अ. 02, श्लो 8
[3] भरतनाट्यशास्त्रम् ,अ. 02 ,श्लो 9
[4] भरतनाट्यशास्त्रम् ,अ. 02, श्लो 20
[5] भरतनाट्यशास्त्रम् ,अ. 02,श्लो 50
[6]भरतनाट्यशास्त्रम् ,अ. 02, श्लो 53-59
[7] भरतनाट्यशास्त्रम् अ. 2 श्लो. 40-42
[8] भरतनाट्यशास्त्रम् अ. 2 श्लो. 105
[9] भरतनाट्यशास्त्रम् अ. 2 श्लो. 70
[10] भरतनाट्यशास्त्रम् अ. 2 श्लो 71
[11] भरतनाट्यशास्त्रम् का विवेचन पृ. 39
[12]भरतनाट्यशास्त्रम् का विवेचन पृ. 41
[13]भरतनाट्यशास्त्रम् अ. 2 श्लो 10
[14] भरतनाट्यशास्त्रम् अ. 2 श्लो 24
[15]भरतनाट्यशास्त्रम् अ. 2 श्लो 104
[16]भरतनाट्यशास्त्रम् (गो.वा.के) पृ. 42
[17] भरतनाट्यशास्त्रम् (गो.वा.के) पृ. 43
[18]भरतनाट्यशास्त्रम् (गो.वा.के) पृ. 43
[19] भरतनाट्यशास्त्रम् (गो.वा.के) पृ. 44
[20]भरतनाट्यशास्त्रम् (गो.वा.के) पृ. 45
[21]भरतनाट्यशास्त्रम् अ. 2 श्लो 108
[22] भरतनाट्यशास्त्रम् अ. 2 श्लो 110
[23] भरतनाट्यशास्त्रम् अ. 2 श्लो 6
[24] भरतनाट्यशास्त्रम् अ. 3 श्लो 1-2

**आचार्यः, ज्योतिषविभागः**
**राष्ट्रियसंस्कृतसंस्थानम्, भोपालपरिसरः**

# कुहनाभैक्षवप्रहसनस्येतिवृत्तसमीक्षणम्

✍डा. नारायणन्. ई. आर्.

## मङ्गलाचरणम्

**दक्षाधःकरपङ्कजे रवमयीं वीणां वहन्तीं सदा**
**दक्षोर्ध्वे जपमालिकां मणिगणैराभूषिताङ्गां वराम्।**
**वामाधःकरसम्भृताखिलपराविद्यासुपुस्तान्वितां**
**सुस्मेरस्फुटिताधरां सुनयनां वाचामधीशां भजे।।**

### उपोद्घातः

कुहनाभैक्षवाख्यं किञ्चित् प्रहसनं बोम्मगण्टिगङ्गाधरसुततिरुमलनाथकृतिष्वन्यतमं अर्थलिप्सया धर्मश्रवणादि-विमुखानां भिक्षूणां परिहासार्थं रूपकविषयीकृतं तावदत्र निरीक्षामहे। प्रस्थानेऽस्मिन् विद्धशालभञ्जिकामत्तविलासादीनि सहृदयैः परिशीलितपूर्वाण्यपि तु राष्ट्रियसंस्कृतसंस्थाने सहृदयान्तराणामलङ्कारशास्त्रशुश्रूषुतयाऽध्येतॄणां विशिष्य साहित्यविभागे समधीयानानामस्मच्छिष्याणामामोदार्थं संकलितमिदं निरीक्षणं मन्ये समेषां सरस्वतीकटाक्षपात्राय प्रकल्पतइति। प्रहसनेऽस्मिंस्तावल्लक्ष्ये नाट्यशास्त्रदशरूपकसाहित्यदर्पणादितल्लक्षणग्रन्थस्वारस्येन निरीक्षणमुपकल्पयामः। तदुपक्रमे कुहनाभैक्षवपदनिष्पत्तिः, रूपकपात्रपरिचयः, कुहनाभैक्षवस्येतिवृत्तम्, रूपकपात्रवैशिष्ट्यम्, प्रहसनलक्षणम्, लक्षणस्य लक्ष्यसमन्वयः, रूपकन्तरसंवादश्चेति नैकानत्र विषयान् संक्षिपामः।

### कुहनाभैक्षवपदस्य निष्पत्तिः।

कुह विस्मायने, चुरादिरात्मनेभाषः, सकर्मकः, सेट्। कुहयते विस्मापयति। विस्मायनमन्यतो विस्मयोत्पादनम्। कुह इत्यतो ण्यासश्रन्थो युच् (३. ३. १०७) इति युचि कुहना। दम्भचर्या इति मेदिनी। लोभान्मिथ्येर्यापथकल्पना इत्यमरः। अर्थलिप्सया मिथ्याचारभेदस्य सम्पादना। दम्भमात्रकृतध्यानमौनादिः। अर्थलिप्सया धर्माश्रवणमिति भरतः। भिक्षूणां समूहो भैक्षवः। ओरञ्। अणोऽपवादः। कुहनया दम्भचर्यया लोभान्मिथ्येर्यापथकल्पनया वा, अर्थलिप्सया, मिथ्याचारभेदस्य सम्पादनया दम्भमात्रकृतध्यानमौनादिना वा, अर्थलिप्सया धर्माश्रवणेन युक्ता ये भिक्षवस्तेषां समूहो कुहनाभैक्षवः।

### कुहनाभैक्षवस्येतिवृत्तम्।

गोपिकारमणाख्यो विटः कश्चिद् भिक्षुश्चन्द्ररेखाख्यायामतिरक्त उन्मत्तः। चन्द्ररेखापि अहम्मदखानाख्यस्य यूनः कस्यचित्तुरुष्कस्य महाराजच्छत्रधारिणो गणिका। गोपिकारमणस्य शिष्यो दामोदरस्तत्कथामुपस्थापयति। गणिकान्तरं शङ्करकौशिकी नाम्नी दामोदरमुन्मत्तस्य भिक्षुगुरोरस्योन्मत्ततां विवृणोति। दामोदरः शङ्करकौशिक्याः सर्वं गुरोर्दुर्वृत्तं शृणोति। अथ भिक्षुगोपालसंवादस्तत्र गोविन्दोऽपि भिक्षोश्शिष्यः। चन्द्ररेखा अहम्मदखानस्यान्तःपुरे वर्ततइति भिक्षोः खेदः। सगोविन्दो भिक्षुर्देवोद्यानं प्रविशति कृष्णनमस्कारपुष्पसञ्चयनादिमिषेण। तत्र स चन्दरेखया सह रमते। कस्यचित्तुरुष्कस्योद्यानप्रवेशाद् भिक्षो रमणं विघ्नितम्। भिक्षवे जातकोपा शङ्करकौशिकी हम्मीरखानवेषधारिणी गृहीतखड्गा भिक्षुं भाययति। अथ गोविन्ददामोदरसंवादस्तत्राहम्मदखानदस्तुरखानयोर्मिथ चन्द्ररेखानिमित्तं वैरं प्रवृत्तमिति सूच्यते। कौमुदिकाच्छन्नवेषेण भिक्षुरहम्मदखानसभाप्रवेशो दामोदरेण निर्दिष्टः, दामोदरश्च चेटीवेषधारी। अहम्मदखानसभायां हास्यपूर्णो रङ्गः प्रचलति। पुनरपि भिक्षुचन्द्ररेखयोर्मेलनं हास्यपरम्। तत्र दामोदरगेविन्दयोरपि सरसभाषणं तदेव परिपोषयति। दामोदरो वदति भिक्षुं प्रतिभगवन्, किं ते भूयः प्रियमुपहरामि? भिक्षुराह-किमतः परं प्रियमस्ति, **अतिसन्धाय तरसा तुरुष्कसरघव्रजम्। सच्छिष्येण त्वया यस्मान्मधुधारा ममार्पिता।।** (कु. भै. ६१) इति। अथ भरतवाक्येन प्रहसनसमाप्तिः।

### कुहनाभैक्षवपात्रवैशिष्ट्यम्।

अत्र प्रहसने भिक्षुः, दामोदरः, गेविन्दः, चन्द्ररेखा च स्वस्वपात्रदृष्ट्योत्तमतां भजन्ते। भिक्षुः कामी मठपूजादिविमुखो यथाकालं चन्द्ररेखाशङ्करकौशिक्याद्यासु रक्तो विटदेश्यः प्रतिभाति। वेषैकमात्रे भिक्षुत्वे, विटैकशीलत्वात् मत्तविलासादिपात्रेष्विव सुगतानां कापालिकानां पाशुपतानां वा यथासंगतं संस्कारापचयं तथासंगत-मनेनेतिवृत्तेन भैक्षवं प्रहसनमिदं प्रकाशयति। यथा-

"रत्या विमुक्त इव नीलवृषो वितन्तुः" (कु. भै. १०) इत्यादीनि शिष्यवाक्यान्यत्र निदर्शनम्। विद्धशालभञ्जिकाया-मपि यथा गुरुस्तथैव शाण्डिल्यः। नियमेनाचरणीये भिक्ष्वादितत्त्वे कुहनया वृत्त्या कामचारिता परिहासेन प्रद्योतिता। चन्द्ररेखापि भिक्षोस्तत्रानुकूलायते यथोद्यानक्रीडोन्नमनादिकेलिष्विति नात्र विस्तरः।

**कुहनाभैक्षवस्य पात्रपरिचयः।**

| पात्राणि | सम्बन्धः | पात्राणि | सम्बन्धः |
|---|---|---|---|
| सूत्रधारः | प्रहसनप्रावर्तकः | तुरुष्कः | कश्चिद् भटः तुरुष्कसैन्यस्थः |
| नटी | सूत्रधारस्य पत्नी | अहमदखानः | युवा तुरुष्कः महाराजः |
| दामोदरः | गोपिकारमणस्य भिक्षोः शिष्यः | किङ्करः | अहमदखानस्य सेवकः |
| शङ्करकौशिकी | गणिका | चकोरिका | करण्डिकावाहिनी |
| भिक्षुः | गोपिकारमणाख्यो विटः | माधविका | स्त्रीवेषधारी दामोदरः |
| गोविन्दः | गोपिकारमणस्य भिक्षोः शिष्यः | कौमुदिका | चन्द्ररेखायाः सखी |
| चन्द्ररेखा | गणिका | हम्मीरखानः | अहमदखानस्य सैनिकः |

प्रहसनं नाम भगवत्तापसविप्रैरन्यैरपि हास्यवादसंबद्धम्, कापुरुषसंप्रयुक्तम्, परिहासाभाषप्रायं रूपकमिति भरतः (नाट्यशास्त्रम्. १८-१५५)। पाखण्डिविप्रप्रभृतिचेटचेटीविटाकुलं वेषभाषाभिश्चेश्चेष्टितं हास्यवचोन्वितं कामुकादिवचोवेषैः षण्ढकञ्चुकितापसैर्युक्तं रूपकं तदिति धनञ्जयः (दशरूपकम्. ३.५४-५५)। भाणवत्संधिसंध्यगलास्यांगांकैर्विनिर्मितं निन्द्यानां कविकल्पितं वृत्तं प्रहसनमिति विश्वनाथः (साहित्यदर्पणः ६.२६४)। भाणवत्संध्यंगवृत्त्यंगवर्णनं पाषण्डविप्रप्रभृति-चेटचेटीविटाकुलं हास्यवचोन्वितं हास्यरसप्रधानं रूपकं प्रहसनमिति विद्यानाथः (प्रतापरुद्रीयम्. ३.४१-४४)।

**प्रहसनलक्षणस्य कुहनाभैक्षवे समन्वयः।**

निन्द्यानां कविकल्पितं वृत्तम्, हास्यवचोन्वितं हास्यरसप्रधानम्, कापुरुषसंप्रयुक्तम्, कामुकादिवचोवेषैः षण्ढकञ्चुकितापसैर्युक्तं रूपकमित्यादिसर्वाङ्गीणप्रहसनलक्षणं समन्वितं पश्यत, यथा कुहनाभैक्षववाचिकैकदेशाः—

भिक्षुः—(सरोमाञ्चमात्मगतम्) अहो सुखस्पर्शता वेश्याकरस्य!

**रण्डाभिर्बहुधा स्पृष्टे व्यासपूजासु मे पदे। नैतादृशं सुखं क्वापि वञ्चितोऽस्मि चिरं वृथा।। (२३)** इति।

यथा वा— भिक्षुः—अबले किं दण्डप्रयासेन? **त्वामेव तन्वङ्गि समुल्लिपामि द्वाभ्यां कराभ्यामिह पुष्पहेतोः। प्रह्वे मयि न्यस्तपदाम्बुजा वा सुखेन सम्पादय पुष्पजातम्।। (२५)** (चन्द्ररेखायाः पुरतः प्रह्वस्तिष्ठति)। यथा वा— **गाढं समाश्लिष्य नितम्बमस्याः करान्तसंस्पृष्टनितम्बमूलः। हा हन्त शाखामृगरूपभाजा हतेन दैवेन निवारितोऽस्मि।। (२६)** इति।

यथा वा— भिक्षुः—**जायते विघ्नमेघालिश्चन्द्ररेखावलोकने । सच्छिष्येण त्वया भद्र मारुतेनापसार्यते।।** (४८) इति। यथा वा— भिक्षुः—(सर्वतोऽवलोक्य) अहो वृक्षवाटिकायाः सौभाग्यम्! **हसन्तीव लताः पुष्पैर्वर्धयन्ति पिकस्वरैः। मानसावर्जने पुंसां वेश्याभिश्शिक्षिता इव।।** (४९) इत्थं प्रहसनलक्षणं कुहनाभैक्षवे सम्यक्समन्वितम्। विस्तरस्तु सहृदयैः स्वयमूह्यम्।

**रूपकान्तरसंवादः।**

संवादो ह्यन्यसादृश्यं तत्पुनः प्रतिबिम्बवत्। आलेख्याकारवत्तुल्यदेहिवच्च शरीरिणाम्॥ (ध्वन्यालोकः-४.१२) इति, **तत्र पूर्वमनन्यात्म तुच्छात्म तदनन्तरम् । तृतीयं तु प्रसिद्धात्म नान्यसाम्यं त्यजेत्कविः॥** (ध्वन्यालोकः-४.१३) इति चानन्दवर्धनोक्तिस्वारस्येन संवादतत्त्वमनुस्मारयतेवात्र कुहनाभैक्षवस्यापि शरीरिणां तुल्यदेहिवदिवान्यसाम्यरूपः संवादो "मत्तविलासेन" वा "विद्धशालभञ्जिकया" वा "धूर्तसमागमेन" वा "लटकमेलनेन" वा प्रहसनान्तरेण वा सह स्पष्टः। विस्तरभयाच्च सर्वोऽपीह न प्रतन्यते।।

**सन्दर्भग्रन्थसूची**


1. नाट्यशास्त्रम्–आचार्यभरतमुनिविरचितः, परिमलपब्लिकेशनस्, दिल्ली, प्रथमसंस्करणम् – १९९८.
2. मलयमारुतः, चतुर्थः स्पन्दः–वि. राघवन्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, १९७८.
3. श्रीजगन्नाथवल्लभनाटकम्, विष्णुप्रिया ओझा, फ्रेण्डस् पब्लिशर्स १९८२.
4. साहित्यदर्पणः–विश्वनाथविरचितम्, काशीसंस्कृतग्रन्थमाला १४५, चौखम्बासंस्कृतसंस्थान, वाराणसी, पुनर्मुद्रणम् – २०११.
5. संस्कृत नाटिकाओं का नाट्यशास्त्रीय अध्ययन, डॉ. प्रमिला संजय, रोशन ऑफसेट प्रेस, दिल्ली-११०००२, २००६.
6. दशरूपकम् – धनञ्जयः, धनिकाकृतावलोकसहितम्, चौखम्बा विद्याभवन, वाराणसी, प्रथमसंस्करणम् – १९६७.
7. अलङ्कारशास्त्रस्येतिहासः – डा. जगदीशचन्द्र मिश्रः चौखम्बा प्रकाशनम्, वाराणसी, प्रथमसंस्करणम् -२००१.
8. शृङ्गारप्रकाशः भोजराजकृतः, द्वितीयो भागः, महामहोपाध्यायो रेवाप्रसादो द्विवेदी, सदाशिवकुमारो द्विवेदी, इन्दिरागाँधीराष्ट्रिय-कलाकेन्द्रम्, नईदिल्लीकालिदास-संस्थानम्, वाराणसी-२२१००१, २००७.
9. सौन्दर्यशास्त्रम्, ममताचतुर्वेदी, राजस्थानहिन्दीग्रन्थअकादमी, जयपुरम्, २००२.
10. संस्कृत नाटिकाओं का नाट्यशास्त्रीय अध्ययन, डॉ.प्रमिला संजय, रोशन ऑफसेट प्रेस, दिल्ली-११०००२, २००६.
11. श्रीजगन्नाथवल्लभनाटकम्, विष्णुप्रिया ओझा, फ्रेण्डस् पब्लिशर्स, १९८२.
12. विदग्धमाधवम्, श्रीरूपगोस्वामिविरचितम्, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली-७, १९७०.
13. नाट्यदर्पणम्, पं. थानेश्चन्द्र उप्रैती, परिमलपब्लिकेशन्स्, दिल्ली-७, १९९४.
14. नाटकचन्द्रिका, पं. बाबुलालशुक्लेन सम्पादिता, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली-७, १९६४.
15. The Latakamelana, (Dramatic Prakrit Satirising the Digambara Jains) composed by Shankhadhara, Bühler & Petersen, Cat. Guj. II. 122, 1883-4.; A Journey of Literary and Archaeological Research in Nepal and Northern India During the Winter of 1884-85, by Cecil Bendall, 1886. Reprint: Publ. Asian Educational Services, New Delhi-2, 1991, ISBN: 8120606159, 9788120606159.
16. The Dhūrtasamāgama : Jyotirīśvara, Jagadīśvara Bhaṭṭacārya.; Carl Cappeller, 1883.; Dhūrtasamāgama & Hāsyārṇava, Ed. Cappeller, Volume 1571 of Harvard College Library Preservation Microfilm Programme, 44 pages.
17. विद्धशालभञ्जिका, राजशेखरकृता, भास्कर-रामचन्द्र आप्टे द्वारा सम्पादिता-पूना-1886.
19. मत्तविलासप्रहसनम्, महेन्द्रविक्रमवर्मदेवकृतम्, चौखम्भाविद्याभवनग्रन्थ-माला, वाराणसी-1966.; त्रिवेन्द्रं संस्कृत सीरीस-4, 1917.



**वरीयान् सहायकाचार्यः , साहित्यविभागाध्यक्षश्च,**

**रा.सं.सं. क.जे. सोमैयासंस्कृतविद्यापीठम्,**

# प्राकृतिक आपदाओं का ज्योतिषशास्त्रा की द्वारा पूर्वानुमान

✍डॉ. राजीव रंजन

भारतीय ज्योतिषशास्त्र के प्रवर्त्तक आचार्यों ने अपनी मेधा शक्ति द्वारा न केवल मनुष्य-मात्र अपितु सम्पूर्ण विश्व से सम्बन्धित शुभाशुभ फलादेश करने की विधि को विकसित किया। सृष्टि के आरम्भ से ही प्राकृतिक आपदाओं ने विश्व की कई विकसित और विकासशील सभ्यताओं को नष्ट कर दिया है अथवा उसे अपूरणीय क्षति पहुँचाई है। वैज्ञानिक शोध भी यह सिद्ध करते हैं कि प्राकृतिक आपदाओं ने ही डायनोसोर सदृश विशाल जीवों का असितत्व ही समाप्त कर दिया था। आज की परिस्थिति भी उस प्राचीन कालीन विवशता से भिन्न नहीं है। वत्र्तमान परिदृश्य पर दृष्टिपात करें तो स्पष्ट हो जाता है कि ये प्राकृतिक आपदाएँ आकस्मिक रूप से आती हैं और उस क्षेत्रा विशेष की मानव सभ्यता, सम्पत्ति, सामाजिक व आर्थिक स्वरूप को तहस-नहस कर देती हैं तथा अपना व्यापक व विनाशकारी प्रभाव छोड़ जाती हैं। आज के युग को वैज्ञानिक युग कहा जाता है फिर भी इन प्राकृतिक आपदाओं के समक्ष मनुष्य असहाय नशर आता है। भूकम्प, ज्वालामुखी विस्फोट, बाढ़, चक्रवाती तूफान, सुनामी, सूखा, बादल का फटना, भूस्खलन, उल्कापात, वज्रपात, हिमस्खलन आदि घटनाओं की गणना हम प्राकृतिक आपदाओं के रूप में कर सकते हैं। इन आपदाओं के पूर्वानुमान तथा समाज पर इनके व्यापक प्रभाव का अध्ययन ज्योतिषशास्त्र के संहिता स्कन्ध में अत्यन्त विस्तार से किया गया है। मनुष्यों में पापों के आधिक्य और अविन्य से ही ये उपद्रव या उत्पात होते हैं। मनुष्यों के इन पापकर्म तथा अविनय से देवगण अप्रसन्न होते हैं तथा इन उत्पातों को उत्पन्न करते हैं।विभिन्न प्राकृतिक आपदाओं के ज्योतिषशास्त्र की विभिन्न विधाओं द्वारा पूर्वानुमान विधि को क्रमशः प्रस्तुत करते हैं।

**प्राकृतिक आपदाओं के पूर्वानुमान में प्रयुक्त विभिन्न प्रमुख ज्योतिषशास्त्रीय सिद्धान्त-** संहिता ज्योतिष में नवग्रहों के विभिन्न नक्षत्रों में चार द्वारा प्राकृतिक आपदा विषयक फलादेश की विधियाँ बताई गई हैं। विभिन्न ग्रहों के आपसी युति व दृष्टि सम्बन्ध भी इन घटनाओं की पूर्व सूचना देने में समर्थ हैं। विभिन्न चक्रों के निर्माण द्वारा अतिवृष्टि, अनावृष्टि, भूकम्प, निर्घात, दिग्दाह, भूकम्प आदि का फलादेश बताने की विधि नरपतिजयचर्यास्वरोदय ग्रन्थ में उपलब्ध होती है । विभिन्न वृक्षों में लगने वाले फल अथवा पुष्पों की मात्रा द्वारा उपरोक्त विषयक फलादेश किया जा सकता है, इसका वर्णन वराहमिहिराचार्य ने अपने ग्रन्थ वाराहीसंहिता के फलकुसुमलताध्याय में की है । काकतन्त्र की विभिन्न विधियाँ इन आपदाओं का पूर्वानुमान करने में सक्षम हैं। हस्तसंजीवन ग्रन्थ प्रश्नकत्र्ता द्वारा हस्तस्पर्श तथा चेष्टाओं से भी बाढ़, सूखा, भूकम्प आदि का फलादेश करना बताता है।शकुन शास्त्र में विभिन्न जीव-जन्तुओं के व्यवहारों के अध्ययन द्वारा इन प्राकृतिक घटनाओं के पूर्वानुमान की विधि बताई गई है। ज्योतिशास्त्र की उपरोक्त विधियों का आश्रय लेकर तथा ऋषि प्रणीत ग्रन्थों को आधार मानकर विभिन्न प्राकृतिक आपदाओं के पूर्वानुमान में सहायक सिद्धान्तों तथा बिन्दुओं को क्रमवार रूप से प्रस्तुत किया जा रहा है।

**अतिवृष्टि/बाढ़-** यदि आषाढ़ी पूर्णिमा के दिन सूर्यास्त के समय पश्चिम दिशा से हवा बहे तो उस वर्ष अतिवृष्टि होती है। वर्षा ऋतु में यदि राशि चक्र में बुध व शुक्र के समीप सूर्य हो तो अत्यधिक वृष्टि होती है। बुध और शुक्र समीप हों तो भी अतिवृष्टि। जब राशि चक्र में सूर्य से पीछे या आगे समस्त ग्रह हों तो भूमि समुद्र के समान बन जाती है। त्रिनाड़ी चक्र में जब समस्त शुभ व पाप ग्रह एक नाड़ी में हों तो अत्यधिक वृष्टि। सप्तनाड़ी चक्र के जलनाड़ी में शुक्र व चन्द्रमा के होने पर अतिवृष्टि। वर्षा ऋतु में जिस दिन एक ही नक्षत्र में कई ग्रह अथवा समस्त ग्रह एकत्रित हों तो अतिवृष्टि। अमृत नाड़ी में यदि चन्द्रमा के साथ 4 या अधिक ग्रह स्थित हों तो सात दिन तक निरंतर घनघोर वृष्टि होती है। चन्द्रमा व भौम एक नाड़ी में, गुरू के उदय व अस्त में, मार्गी होने के समय, वक्री होने पर और संगम हो जाने पर जल नाड़ी में समस्त ग्रह हों तो अत्यधिक वृष्टि। अर्जुन वृक्ष पर यदि पुष्पादि का अधिक्य हो तो उस वर्ष प्रभूत वृष्टि। प्रश्नकालीन लग्न में जलराशि में स्थित चन्द्रमा पर बलवान शुक्र की दृष्टि, अथवा बलवान चन्द्रमा पर शुक्र की दृष्टि भारी वर्षा कराता है। सूर्य, चन्द्रमा, मंगल, शनि व राहु जलीय राशियों में हो और शुक्र, बुध स्थिर राशि में हो तो भीषण वर्षा होती है। वर्षा के प्रश्नकालीन के शकुन में कृष्ण गौ या भरे हुए कृष्ण घड़े का दर्शन हो तो प्रभूत वृष्टि। यदि प्रश्न कारक पाँच अंगुली के स्पर्श में अंगूठे का स्पर्श करे तो महावृष्टि। काक बलिपिण्ड द्वारा यदि पूर्वानुमान किया जाये तो जलपिण्ड ग्रहण करने पर प्रभूत वर्षा। काक यदि वृक्ष के अग्रभाग पर घोंसला बनाए तो अति वर्षा।

**भूस्खलन-** चन्द्रमा अनुराधा नक्षत्र में हो तथा बुध व मंगल पुष्य नक्षत्र में हो तो भूस्खलन का भय। अत्यधिक वर्षा के ग्रहयोग पर्वतीय क्षेत्रों में भूस्खलन योग का निर्माण करते हैं। ग्रहों का जलीय, प्रचण्ड व सौम्य नाड़ी में होना भी भूस्खलन का भय उत्पन्न करते हैं। चन्द्रमा वृश्चिक या धनु राशि तथा शुक्र सिंह में हो तो हिमस्खलन या भूस्खलन की संभावना। भूस्खलन जैसी प्राकृतिक आपदा का मूल कारण शनि और राहु की युति को माना जा सकता है। राहु को वन तथा पर्वतीय प्रदेश का स्वामी माना जाता है और शनि के साथ युति इसे प्रबल भूस्खलन का कारण बनाता है।

**सुनामी-** सप्तनाड़ी चक्र, त्रिनाड़ी चक्र के सूक्ष्म विश्लेषण द्वारा इस प्राकृतिक आपदा का पूर्वानुमान किया जा सकता है। समुद्र के अंदर आने वाले भूकम्प इस आपदा के प्रमुख कारण है। अतः समुद्री इलाकों में भूकम्प के ग्रहयोग, गोचर, शकुन या प्रश्नादि द्वारा इस आपदा का पूर्वानुमान किया जाता है। सूर्य और शनि यदि वृश्चिक अथवा मेष राशि में स्थित हों तो समुद्री तूफान का योग बनता है। सूर्य ग्रहण व चन्द्र ग्रहण के समय मंगल, बुध व शनि का आपस में संबंध हों तो सुनामी का भय होता है। इसी तरह, राहु व केतु के मध्य चार या अधिक ग्रह अशुभ स्वामियों के नक्षत्र पर हों तथा शनि का मंगल, गुरू अथवा बुध के साथ संबंध बन रहा हो तो भी समुद्री तूफान का भय होता है।

**धूलिवर्षा-** गुरू, शनि, शुक्र तथा बुध एक ही राशि में स्थित हों तो धूलिवर्षा का योग बनता है।

**उल्का पतन-** सूर्य से पाँचवे या सातवें चन्द्रमा और छठे स्थान में मंगल हो तो उल्कापात होता है। यदि शुभ ग्रह मित्र भावों में स्थित न हों तो पर्वतों पर विद्युत्पात होता है।

**अनावृष्टि/सूखा-** आषाढी पूर्णिमा के दिन सूर्यास्त के समय आग्नेय कोण अथवा दक्षिण दिशा से वायु चले तो उस वर्ष अनावृष्टि होती है तथा धान्यों का विनाश होता है ।इसी दिन और इसी समय यदि नैऋत्य कोण से हवा बहे तो भी अनावृष्टि होती है। सूर्य के अगली राशि में यदि मंगल हो तो अनावृष्टि का योग बनता है। बुध और शुक्र के मध्य सूर्य स्थित हो तो सूखा। त्रिनाड़ी चक्र में नपुंसक ग्रह तथा स्त्री ग्रह एक ही नाड़ी में हों तो अनावृष्टि। वर्षा ऋतु में जब चन्द्रमा व शुक्र एक ही राशि में पाप ग्रह से दृष्ट या युक्त हों तो अल्पवृष्टि या अनावृष्टि। चन्द्रमा यदि केवल पापग्रह से मिले तो अल्पवृष्टि। सप्तनाड़ी चक्र के जिस नाड़ी में केवल पापग्रह स्थित हों तो उसमें वृष्टि का अभाव होता है। जिस वर्ष शीशम में अधिक फल लगें तो दुर्भिक्ष का भय। निचुल वृक्ष में फल-फूल अधिक हों तो अवृष्टि। यदि लताओं के पत्रों में छिद्र, शुष्कता व रूक्षता हों तो उस वर्ष वृष्टि का अभाव। यदि खैर के वृक्ष में पुष्पादि की वृद्धि हो तो अकाल का प्रकोप। वर्षा के प्रश्न लग्न में चतुर्थ भाव में शनि और राहु हो तो उस वर्ष महाघोर दुर्भिक्ष। यदि प्रश्नकारक पाँच अंगुली के स्पर्श में अनामिका को स्पर्श करे तो अत्यल्प वृष्टि। काकबलि पिण्ड में यदि कौआ वायव्य कोण का पिण्ड भक्षण करे तो अनावृष्टि। यदि त्रिपिण्ड में से अंगार पिण्ड ग्रहण करे तो वृष्टि का अभाव। काक वृक्ष के नीचे थड़ में घर बनाए तो अनावृष्टि और अकाल। किसी वृक्ष, भवन, वल्मीक के कोटर में घोंसला बनाए तो अकाल का प्रबल भय। मंगल आश्लेषा नक्षत्र में हो तो अकाल।

**तूफान-** आषाढी पूर्णिमा के दिन सूर्यास्त के समय वायत्य कोण से वायु चले तो उस वर्ष आंधी का भय होता है। बुध के साथ मंगल या शनि का योग हो तो तूफान के साथ-साथ अग्नि भय भी होता है। त्रिनाड़ी चक्र की एक ही नाड़ी में नपुंसक व स्त्री ग्रहों का योग हो तो तीव्र वायु चलती है, इसी प्रकार समस्त पुरुष ग्रह एक ही नाड़ी में हो तो भी वायु का प्रकोप होता है। सप्तनाड़ी चक्र के चण्ड अथवा वायु नाड़ी में ग्रह हों तो आंधी-तूफान का भय। विशाखा, अनुराधा व ज्येष्ठा अर्थात् नपुंसक नक्षत्रों में योग होने पर तीव्र वायु चलती है और प्रभूत विनाश होता है। कपित्थ वृक्ष में फल-फूल अधिक हों तो उस वर्ष वायु का प्रकोप। कौआ वृक्ष के वायव्य कोण की शाखा पर घोंसला बनाए तो आंधी-तूफान का भय। नैऋत्य कोण का घोंसला भी आंधी-झंझावत का भय उत्पन्न करता है। अक्षय तृतीया के दिन की ग्रहस्थिति के अनुसार भौमचक्र का निर्माण करें, इस चक्र में राहु जहाँ पड़े, उस नक्षत्र के अक्षरानुसार जो देश व स्थान हों वहाँ बवंडर, आंधी आदि का प्रकोप।दो या उससे अधिक ग्रह जल राशि, दहन नाड़ी, प्रचण्ड नाड़ी और सौम्य नाडियों में हो तो तूफान का भय। चन्द्र बुध की युति हो तथा सूर्य मूल नक्षत्र में हो, जब बृहस्पति और बुध सूर्य के साथ स्थित होकर स्वराशियों में स्थित ग्रहों के अनुवर्त्ती हों तो भयंकर तूफान आता है ।इसी प्रकार मनुष्य, सर्प तथा छोटे जन्तु युद्ध करते दिखाई दें तो भी तूफान का भय होता है।

**भूकम्प-** जहाँ तक ज्योतिषशास्त्र के ग्रन्थों का प्रश्न है इन ग्रन्थों में भूकम्प के कारणों की अपेक्षा भूकम्प के पूर्वानुमान के सम्बन्ध में अधिक चर्चा की गई है। ग्रहचार अध्यायों मंे यथा भौमचार, शनिचार, राहु चार, ग्रहणाध्याय आदि में विभिन्न ग्रहस्थितियों की अत्यन्त विस्तृत चर्चा की गई है जो संभावित भूकम्प के द्योतक माने गए हैं। शकुन शास्त्र के विभिन्न ग्रन्थों यथा वसन्तराज शाकुन में भी इस सन्दर्भ में चर्चा की गई है। भूकम्प से पूर्व पशुपक्षियों के व्यवहार में आने वाले परिवर्तनों को भी भूकम्प पूर्वानुमान की सहायक सामग्री के रूप मंे प्रयोग किया जा सकता है। सभी ग्रहों की युति एक ही राशियों में हो। यदि मंगल पूर्वा-फाल्गुनी नक्षत्र में उदय करता है अथवा उत्तराषाढा नक्षत्र में वक्री होता है तथा रोहिणी नक्षत्र में अस्त होता है तो सम्पूर्ण पृथिवी मण्डल का भ्रमण अथवा भूकम्प होता है। यदि मंगल मघा एवं रोहिणी नक्षत्र के योगतारा का भेदन करता है तो भूकम्प होता है। विजय संवत्सर में भूकम्प के योग बनते है। धनु राशि में बृहस्पति के जाने पर भूकम्प आता है। शनि जब मीन राशि में हो तो भी भूकम्प होते हैं। वृष तथा वृश्चिक राशि का भूकम्प से विशेष सम्बन्ध दृष्टिगत होता है। गुरू वृष या वृशिचक राशि में हों, तथा बुध के साथ युति कर रहा हो अथवा समसप्तम में हो। राहु मंगल से सप्तम में, बुध मंगल से पंचम में, तथा चन्द्रमा बुध से केन्द्र में हो। मन्दगति ग्रह यदि एक दूसरे से केन्द्र, षष्ठाष्टक, अथवा त्रिकोण भावों में हो, अथवा युति सम्बन्ध बना रहा हो। चन्द्रमा तथा बुध की युति हो एवं दूसरे की राशि या क्षेत्र में हो अथवा एक ही ग्रह के नक्षत्र में हों।सूर्य के सतह पर आनेवाले ज्वार-भाटीय आवेगों का आधिक्य भी भूकम्प की संभावना उत्पन्न करता है। भूकम्प स्थान को कम्पित कर अपने स्थान से हटा देता है । सूर्य की सतह पर दिखने वाले धब्बों में होने वाले विशिष्ट परिवर्तन भी भूकम्प का संकेत देते हैं। प्रायः देखा गया है कि भूकम्प से ठीक पूर्व पशु पक्षियों के व्यवहार मंे काफी परिवर्तन आ जाता है। अपेक्षाकृत आधिक संवेदनशील पक्षी यथा-काक, कबूतर, चील आदि का व्यवहार बदल जाता है। ये समूह में शोर करते हुए उड़ने लगते हैं। कुत्ते तथा गाय आदि भी उच्च स्वर में बोलने लगते हैं। श्वानों का रूदन तथा गौवंश के व्यवहार पर सूक्ष्म दृष्टिपात द्वारा उत्पातों का पूर्वानुमान कर सकते हैं। आधुनिक मुख्य धारा के वैज्ञानिकों ने भी स्वीकार किया है कि जापान के समुद्री तट पर आए सुनामी से ठीक पहले वहाँ पाए जाने वाले डाल्फिन तथा शार्क मछलियों के व्यवहार में काफी परिवर्तन आ गया था। कोई मन्दगति ग्रह वक्री से मार्गी हो रहा हो अथवा मार्गी से वक्री, यह कालावधि भूकम्प की दृष्टि से अत्यधिक संवेदनशील मानी गई है। भूकम्प प्रायः पूर्णिमा अथवा अमावस्या के समीपस्थ तिथियों को आता है।

ज्योतिषशास्त्र की उपरोक्त विधियों का आश्रय लेकर वातावरण तथा मौसम में होने वाले आकस्मिक परिर्वतनों का फलादेश सहज ही किया जा सकता है और मानवता के कल्याण में इस शास्त्र का प्रयोग ही श्रेष्ठतम सिद्ध होता है।

**सन्दर्भ सूची-**


1 ज्योतिर्विदाभरणम; 6/16

2 व.सं.; 45/2

3 नरपतिजयचर्यास्वरोदय; 6/16

4 वाराही संहिता; 29/11-12

5 हस्तसंजीवन, स्पर्शनाधिकार; 3/44

**6 नारदसंहिता;** 35/3

**7 भ्रदबाहुसंहिता;** 9/63

8 वाराही संहिता; 29/11

**9 बृहद्दैवज्ञरंजनम्;** 5/50

10 हस्तसंजीवन, स्पर्शनाधिकार; 3/44

**11 भ्रदबाहुसंहिता;** 27/1

12 व.सं.; 4/7

13 मयूर चित्रकम्; 2/62

14 अद्भुत सागर सां; पृ. 10


**असिस्टेन्ट प्रोफेसर (ज्योतिष), संस्कृत विभाग, दिल्ली विश्वविद्यालय**

# वेदकालीन पत्नी का भारतीय संस्कृति में योगदान

✍ डा. अपर्णा धीर

वैदिक ग्रन्थों में प्रतिपादित संस्कृति में युगों तक मानव मात्र का मार्गदर्शन करने की क्षमता है। वैदिक संस्कृति और समाज में कहे गये सर्वजन-कल्याणकारी नियमों का पालन करने से समाज की विसंगतियाँ दूर होती है। मनुष्य का एक साथ रहकर, मिलकर एवं परस्पर सहयोग करके जीवनयापन का नाम समाज है। इस उदात्त भावना के दर्शन ऋग्वेद में होते हैं। कहा गया है कि मनुष्य सब ओर से मनुष्य की रक्षा करे। समाज की एक इकाई परिवार कहलाती है। परिवार में विद्यमान परस्पर स्नेह ही समाज में सौमनस्य की भावना की पूर्ति करता है। अथर्ववेद में पारिवारिक सौमनस्य को महत्तवपूर्ण बताते हुए माता-पिता तथा पुत्र, भाई-भाई, भाई-बहन, पति-पत्नि में पारस्परिक हित-चिन्ता एवं पूर्ण सौमनस्य की कामना को व्यक्त किया गया है।

वैदिक समाज व्यवस्था में समन्वय एवं कर्त्तव्यनिष्ठा पर बल दिया गया है। समाज में परिवार महत्तवपूर्ण वर्ग माना जाता है। परिवार ही समाज एवं राष्ट्र का आधार है। वैदिक संहिताओं और ब्राह्मणों में कुटुम्ब (परिवार) अर्थ में 'कुल' शब्द का प्रयोग मिलता है। प्रायः वैदिक काल से ही परिवार का मूल स्तम्भ पति-पत्नि का युग्म माना जाता रहा है। पत्नि का सम्बन्ध पति के परिवार से विवाह पश्चात् ही बनता है क्योंकि वह दूसरे परिवार से आती है परन्तु पति के साथ मिलकर बनाये गये नये परिवार में पत्नि की भूमिका विशेष महत्त्व रखती है। वस्तुतः यही नया परिवार आगे चलकर समाज व देश में सामञ्जस्य की स्थापना का कारक है। इस प्रकार परिवार की आधारभूत इकाई पत्नि है। अतः वेदों में वर्णित पत्नि के गुण, अधिकार कर्त्तव्यों को जानना परमावश्यक है। प्रस्तुत शोधलेख में इसी ओर इङ्गित करते हुए वेदकालीन पत्नी का भारतीय संस्कृति में योगदान को दर्शाया जा रहा है।

**पत्नि के लिए प्रयुक्त शब्द :-**

**वधू -** ऋग्वेद में और उत्तरवर्ती साहित्य में 'वधू'शब्द का प्रयोग बहुलता से हुआ है। ऋग्वेद में 'वधू' शब्द दूल्हन अर्थ में प्रयुक्त हुआ है। द्रष्टव्य है कि लौकिक संस्कृत साहित्य में यह वधू शब्द केवल दुल्हन अर्थ का वाचक नहीं अपितु पुत्र और पौत्र की पत्नी भी सूचक है।

**पत्नी -** ऋग्वेद में 'पत्नी' शब्द स्वामिनी, शासिका एवं विवाहित स्त्री के अर्थ में मिलता है (ऋ. 7.75.4, 1.62.11) शतपथ ब्राह्मण में पत्नी को ही स्त्री का वास्तविक स्वरूप मानते हुए 'पत्नी' शब्द का प्रयोग किया गया है।

